## द्वित्रिभ्यामञ्जलेः । (१०२/८०४)

द्वित्रिभ्यां परो योऽञ्जलिशब्दः तदन्तात् तत्पुरुषात् टच् प्रत्ययो भवति । द्वावञ्जली समाहृतौ द्व्यञ्जलम् । त्र्यञ्जलम् । द्विगोः इत्येव, द्वयोरञ्जलिः द्व्यञ्जलिः ।[1] अतद्धितलुकि इत्येव, द्वाभ्यामञ्जलिभ्यां क्रीतः द्व्यञ्जलिः । त्र्यञ्जलिः । प्राचाम् इत्येव, द्व्यञ्जलिप्रियः ॥

## अनसन्तान्नपुंसकाच्छन्दसि । (१०३/३२०७)

अन्नन्तात् असन्तात् च नपुंसकलिङ्गात् तत्पुरुषात् टच् प्रत्ययो भवति छन्दसि विषये[2] । हस्तिचर्मे जुहोति । '[3]ऋषभचर्मेऽभिषिच्यते' (काठ. सं. ३७. ३) । असन्तात् – 'देवच्छन्दसानि' (मै. सं. ३. २. ९) । 'मनुष्यच्छन्दसम्' (तै. सं. ५. ४. ८. ६) । अनसन्तात् इति किम् ? बिल्वदारु जुहोति । नपुंसकात् इति किम् ? 'सुत्रामाणं पृथिवीं [4]द्यामनेहसम्' (ऋ. १०. ६३. १०) ।

[६४१] अनसन्ता[6]न्नपुंसका[6]च्छन्दसि वावचनम् । (म. भा. २. ४४१)

'ब्रह्मसाम' (तां. ब्रा. ४.३.१), 'ब्रह्मसामम्' (तै. सं. १.८.१८.१) । '[7]देवच्छन्दः' (शां. ब्रा. १.५), 'देवच्छन्दसम्' (तै. सं. ५.४.८.५) ॥

## ब्रह्मणो जानपदाख्यायाम् । (१०४/८०७)

ब्रह्मन्शब्दान्तात् तत्पुरुषाद् टच् प्रत्ययो भवति [8]समासेन चेद् ब्रह्मणो जानपदत्वमाख्यायते । [9]जनपदेषु भवः जानपदः । यस्य तत्पुरुषस्य जनपदशब्दः पूर्वपदं तस्मादेतत् प्रत्ययविधानम् । सुराष्ट्रेषु ब्रह्मा सुराष्ट्रब्रह्मः । अवन्तिब्रह्मः[10] । योगविभागात् [11]सप्तमीसमासः । जानपदाख्यायाम् इति किम् ? देवब्रह्मा नारदः ॥

## कुमहद्भ्यामन्यतरस्याम् । (१०५/८०६)

कुमहद्भ्यां परो यो [12]ब्रह्मा तदन्तात् तत्पुरुषाद् टच् प्रत्ययो भवत्यन्यतरस्याम्[13] । [14]कुब्रह्मः, कुब्रह्मा । [15]महाब्रह्मः, [16]महाब्रह्मा । ब्राह्मणपर्यायो ब्रह्मन्शब्दः ॥

## द्वन्द्वाच्चुदषहान्तात् समाहारे । (१०६/९०४)

[17]तत्पुरुषाधिकारो निवृत्तः । द्वन्द्वात् चवर्गान्तात्, दकारान्तात्, षकारान्तात्, हकारान्तात् च टच् प्रत्ययो भवति, [18]स चेद् द्वन्द्वः समाहारे वर्तते, नेतरेतरयोगे । वाक् च त्वक् च वाक्त्वचम् । [19]स्रक् च त्वक् च स्रक्त्वचम् । श्रीस्रजम् । इडूर्जम् । [20]वागूर्जम् । [21]समिद्दृषदम् । सम्पद्विपदम् । [22]वाग्विप्रुषम् । छत्रोपानहम् । धेनुगोदुहम् । द्वन्द्वात् इति किम् ? तत्पुरुषान् मा भूत्, पञ्च वाचः समाहृताः पञ्चवाक् । चुदषहान्तात् इति किम् ? वाक्समित् । समाहारे इति किम् ? प्रावृट्शरदौ ॥

---

1. त्र्यञ्जलिः इत्यधिकम् ब. ड. 2. च इत्यधिकम् ड. 3. ऋषभचर्मेऽभिषिञ्चति मुद्रितः पाठः. 4. द्यामनेहसाम् क. 5. नपुंसकलिङ्गात् ग. फ. 6. छन्दसि नास्ति फ. 7. देवच्छन्दः, देवच्छन्दसम् नास्ति ह. 8. समासान्तः इत्यधिकम् फ. 9. जनपदे भवः फ. 10. राशिब्रह्मः ड, काशिब्रह्मः क.फ.ह. 11. समासः सप्तम्या ड. 12. ब्रह्मन्शब्दः ब. क. फ. ह. 13. समासान्तः इत्यधिकम् ब. 14. कुब्रह्मः नास्ति क. 15. महाब्रह्मः नास्ति क. 16. महाब्रह्मा नास्ति फ. 17. वाक्यमिदं नास्ति फ. 18. समासान्तः इत्यधिकम् फ. 19. उदाहरणमिदं नास्ति फ. 20. वाक्त्विषम् फ. 21. शमीदृषदम् फ. 22. नास्ति फ.